संस्कृत:वार्ता-

03/02/2026

सायम् - 06:20

मुख्यवार्त्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत् भारत-अमेरिका-देशयोः मध्ये व्यापार-व्यवहारः वैश्विक-व्यापार-विषये सर्वकारस्य सुस्थिर-परिमित-दृष्टिकोणञ्च प्रतिबिम्बयतीति।

- उद्योगसंस्थाः व्यापार-सन्धिं स्वागतीकुर्वन्तः एतत् द्विपाक्षिकव्यापारं वर्धयिष्यति, वृत्यवसरान् च कल्पयिष्यतीति उक्तवन्तः।

- लोकसभायाः अष्टौ विपक्षीय-सदस्याः सभायां असंसदीय-व्यवहाराय अवशिष्टात् आयव्ययक-सत्रात् निलम्बिताः।

- सर्वोच्चन्यायालयेन भारतीयानां डेटा इति दत्तांशानां आदानप्रदानं विरुध्य, मेटा इत्यादिभ्यः बृहत्-संस्थानेभ्यः सञ्चेतना प्रदत्ता।

- महिला-प्रीमियर्-लीग्-क्रिकेट्-क्रीडायां गुजरात्-जायण्ट्स् इत्येतद्दलम् अद्य सायङ्काले वडोदरा-नगरे एलिमिनेटर् इति क्रीडाचक्रे देहली-कैपिटल्स इति दलेन सह क्रीडिष्यति।

प्रधानमन्त्री-एन. डी. ए. उपवेशनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य एन्. डी. ए.पक्षस्य संसदीय-सदस्यान् सम्बोधयन् एतत् उक्तवान् यत् संयुक्तराज्यामरीका-देशेन सह भारतस्य ऐतिहासिक-व्यापार-सन्धिः निरन्तर-सहनशीलतायाः परिणामः अस्तीति। सूत्रानुसारं, प्रधानमन्त्री मोदी अवदत् यत् व्यापार-व्यवहारेण आर्थिकं वातावरणम् निर्मितम् अस्ति, तथा च वैश्विक-व्यापार-वार्तालापविषये सर्वकारस्य स्थिरं परिमाणीयं च दृष्टिकोणम् प्रतिबिम्बयति। सः अवदत् यत् विपक्षिणः शुल्कस्य निन्दाम् अकुर्वन्, परन्तु सर्वकारः सहनशीलः आसीत्, परिणामानि अधुना दृश्यमानानि सन्ति। प्रधानमन्त्री अवदत् यत्, विश्वव्यवस्था परिवर्तमाना अस्ति, तस्य मार्गश्च भारतं प्रति अधिकतया प्रवणः अस्ति।

एन. डी. ए. संसदीय दलम्

एन्. डी. ए. इति पक्षस्य सांसदाः अद्य संसदभवनपरिसरे एन्. डी. ए. संसदीयपक्षस्य सभायां ऐतिहासिक-भारत-अमरीका-व्यापार-व्यवहाराय प्रधानमन्त्रिणः नरेन्द्रमोदिनः अभिनन्दनं कृतवन्तः। सभायाः अनन्तरं वार्ताकारैः सह वार्तालापं कुर्वन् संसदीयकार्यमन्त्री

किरेन रिजिजुः अवदत् यत् अमेरिका-देशेन सह व्यापार-व्यवहारः ऐतिहासिकः अस्ति तथा च भारत-यूरोपीयसङ्घ-मुक्तव्यापार-सन्धौ हस्ताक्षरस्य केवलं एकसप्ताहाभ्यन्तरे अभवदिति। सः अवदत् यत्, प्रधानमन्त्रिणः मोदिनः नेतृत्वे सर्वे विकसितदेशाः भारतेन सह समन्वयेन कार्यं कर्तुम् इच्छन्तीति। श्रीरिजिजूः अवदत् यत् अद्यावधि एकोनचत्वारिंशत् देशैः सह मुक्तव्यापारसमन्वयाः हस्ताक्षरिताः सन्तीति।
नवनिर्वाचितः बीजेपीति दलस्य राष्ट्रियाध्यक्षः नितिन-नबीनः अपि एन्.डी.ए. संसदीयपक्षस्य सभायाम् अभिनन्दितः।

<u>मन्त्रीणां समर्थनम्</u>

केन्द्रीयमन्त्री अमित शाहः, डा. एस्. जयशङ्करः, राजनाथ सिंहः, अश्विनी वैष्णवः, पीयूष गोयलः, किरेन रिजिजूः, नितिन गडकरीः, जे. पी. नड्डाः, अन्नपूर्णा देवी च प्रधानमन्त्रिणं नरेन्द्रमोदिनम् अमरीकादेशस्य राष्ट्रपतेः डोणाल्ड् ट्रम्पस्य अथ भारत-अमरीकादेशयोः जनानां च ऐतिहासिक-व्यापार-समन्वयाय अभिनन्दनं कृतवन्तः। सामाजिकान्तर्जालीये सन्देशे केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः ऐतिहासिक-व्यापार-सन्धिं विन-विन-डील इति अमन्यत्। श्रीवैष्णवः अवदत् यत्, भारत-अमरीका-देशयोः मध्ये शान्तेः विकासस्य च कार्यस्य महती सम्भावना अस्ति। सः अवदत् यत् उभयोः देशयोः नागरिकाः उद्योगाः च अनेन व्यवहारेण लाभान्विताः भविष्यन्ति।

<u>प्रधानमन्त्री मोदी-अमरीका राष्ट्रपतिः</u>

प्रधानमन्त्री नरेन्द्रमोदी पूर्वमेव अघोषयत् यत् मेड्-इन्-इण्डिया-उत्पादेषु अधुना अष्टादशप्रतिशतं न्यूनीकृतं यू. एस्. शुल्कं भविष्यतीति। सः अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह वार्तालापं कृत्वा सामाजिक-प्रसार-माध्यमे एषा घोषणा कृतवान् यत् स्वस्य प्रियमित्रेण राष्ट्रपतिना ट्रम्पेन सह वार्तालापः अद्भुतः आसीदिति, सः अवदत् यत् यदा द्वे बृहती अर्थव्यवस्थे विश्वस्य बृहत्तमं लोकतन्त्रं च मिलित्वा कार्यं कुर्वन्ति तदा जनेभ्यः लाभप्रदमेव भवति।

<u>एफआईईओ-प्रतिक्रिया-भारत-अमरीका सन्धिः</u>

भारतीय-निर्यात-सङ्घटन-सङ्घः अपि भारत-अमरीका-व्यापार-व्यवहारस्य अन्तिमीकरणस्य स्वागतम् अकरोत्, एफ्.आई.ई.ओ. इत्यस्य अध्यक्षः एस.सी.रल्हन् इत्येषः एतत् विकासं भारतीय-निर्यातकानां कृते ऐतिहासिकं सोपानम् इति वर्णितवान्, सः अवदत् यत् शुल्कस्य न्यूनीकरणेन अमेरिकीय-विपण्यां देशस्य उत्पादानां प्रतिस्पर्धात्मकता वर्धयिष्यतीति।

लोकसभायां विरोधः

राज्यसभायां राष्ट्रपतेः अभिभाषणस्योपरि धन्यवादप्रस्तावे चर्चा पुनः समारब्धा। नामनिर्देशितेन सांसदेन सी. सदानन्दन् मास्टर् इत्यनेन ह्यः चर्चायाः प्रस्तावः कृतः। राष्ट्रपतिपदासीना द्रौपदी मुर्मुः जनवरीमासस्य अष्टाविंशति दिनाङ्के उभयोः सदनयोः संयुक्तसम्मेलनम् संबोधितवती। यदा लोकसभायां राष्ट्रपतेः अभिभाषणस्योपरि जायमाना धन्यवादप्रस्ताव-चर्चा अपराह्ले द्विवादने आरब्धा तदा विपक्षस्य नेता राहुलगान्धी भाषणं कृतवान्। सः पुनः पूर्वसेनाप्रमुखस्य एम्. एम्. नरवणे इत्यस्य अप्रकाशितं संस्मरणम् उद्धृत्य वक्तुकामः अभवत् पीठासीन-अधिकारिणा कृष्णप्रसाद-टेनेटी इत्यनेन च भाषणस्य विरोधं कृत्वा उक्तं यत् अध्यक्षः ह्यः एव तस्य विषये निर्णयं प्रदत्तवान्निति। सः सूचीबद्धान् अन्यान् सांसदान् धन्यवादप्रस्तावस्य विषये वक्तुं आह्वयत्। ततः विपक्षस्य सांसदाः सभा-मध्यम् आगत्य विरोधप्रदर्शनम् आरब्धवन्तः, येन लोकसभायाः कार्यजातम् अपराह्ले त्रिवादनं यावत् स्थगितम्।

लोकसभा-विपक्ष निलंबनम्

लोकसभायां विपक्षस्य अष्टसदस्याः अमर्यादित-व्यवहाराय आय-व्यय-संकल्पना-सत्रस्य शेषभागात् निलम्बिताः। एतेषु सांसदाः सन्ति, मणिकम टैगोरः, अमरिन्दर सिंह राजा, गुरजीत सिंह औजला, हिबी ईडनः, डीन कुरियाकोसः, प्रशान्त पडोलः, काङ्ग्रेस्-दलस्य किरण कुमार् रेड्डी, सी. पी. आई. (एम्) दलस्य एस्. वेङ्कटेशन इति च। यदा लोकसभायाः उपवेशनम् अपराह्ले त्रिवादने तृतीय-स्थगनानन्तरं आरब्धम्, तदा विपक्षस्य सांसदाः विभिन्नेषु विषयेषु विरोधप्रदर्शनं आरब्धवन्तः आसन्।

सर्वोच्चन्यायालय-मेटा- वाट्सऐप्

सर्वोच्चन्यायालयेन अद्य उक्तं यत् मेटेत्यादयः टेक्-इति-उद्योगाः दत्तांश-हस्तांतरणेति नाम्ना नागरिकाणां गोपनीयतायाः अधिकारेण सह क्रीडितुं न शक्नुवन्तीति। न्यायालयेन भारतीय-प्रतिस्पर्धा-आयोगस्य आदेशं विरुध्य प्रायः सपाद-द्विशत-कोटिरूप्यकाणां दण्डं विरुध्य कृतायां याचिकायां मेटा, वाट्सऐप् इत्येतयोः गोपनीयता-नीतीति विषये निन्दा कृता। मुख्यन्यायाधीशः अवदत् यत् यदि संविधानस्य अनुसरणं कर्तुं न शक्नुवन्ति चेत् उत्तरदायिनः भारतात् बहिः निर्गच्छेयुरिति।

क्रिकेट-डब्ल्यूपीएल

महिला-प्रीमियर्-लीग्-क्रिकेट्-क्रीडायां अद्य वडोदरा-नगरस्य कोटाम्बीति क्षेत्रे बी. सी. ए. क्रीडांगणे महत्त्वपूर्णायां एलिमिनेटर इति-क्रीडाचक्रे गुजरात्-जायण्ट्स्-दलम् दिल्ली-क्यापिटल्स्-दलं विरुध्य क्रीडिष्यति। क्रीडायाः आरम्भः सायं सार्धसप्तवादने भविष्यति। अस्याः स्पर्धायाः विजेतृदलम् गुरुवासरे अन्तिमक्रीडायां रायल् चैलेञ्जर्स् बेङ्गलूरु इत्यनेन सह भविष्यति।

।। इति वार्ता: ।।